# विशिष्टव्याख्यानमाला

संस्कृतसप्ताहकार्यक्रमस्याङ्गभूतत्वेन दिनाङ्कः 19/08/2024 तः 22/08/2024 पर्यन्तं दिवसचतुष्टयव्यापिनी विशिष्टव्याख्यानाला समनुष्ठिता। तत्रादौ अगस्तमासस्य नवदशदिनाङ्के विशिष्टव्याख्यानमालायाः विशिष्टव्याख्यातृरूपेण समागता आसन् केन्द्रीयसंस्कृतविश्वविद्यालयस्य भोपालपरिसरस्य निदेशकवर्याः साहित्यशास्त्रपारङ्गताः प्रो. रमाकान्तपाण्डेमहोदयाः। "संस्कृतं भारतीयज्ञानपरम्परा च" इति विषयम् आधारीकृत्य ते व्याख्यानं प्रदत्तवन्तः। कार्यक्रमेऽस्मिन् स्वागतभाषणं प्रदत्तवन्तोऽस्माकं महाविद्यालयस्य साहित्यविभागस्य विभागप्रमुखाः डॉ. अमरेन्द्रकुमारमिश्रमहाभागाः एवञ्च धन्यवादार्पणं प्रदत्तवन्तः महाविद्यालयस्य साहित्यविभागस्य आचार्याः डॉ.नृसिंहनाथगुरुमहाभागाः।

विशिष्टव्याख्यानमालायाः द्वितीयदिवसे अगस्तमासस्य विंशतितमे दिनाङ्के विशिष्टव्याख्यातृरूपेण समागता आसन् केन्द्रीयसंस्कृतविश्वविद्यालयस्य लखनऊ-परिसरस्य व्याकरणविभागस्य मूर्धन्यभूताः विभागप्रमुखाः आचार्याः प्रो. भारतभूषणत्रिपाठिमहोदयाः। "काणादं पाणिनीयञ्च सर्वशास्त्रोपकारकम्" इति विषयोपरि तेषां व्याख्यानम् आसीत्। कार्यक्रमेऽस्मिन् स्वागतभाषणं प्रदत्तवन्तोऽस्माकं महाविद्यालयस्य व्याकरणविभागस्य अतिथि-अध्यापकाः डॉ. हरिपदवेरामहाभागाः एवञ्च धन्यवादार्पणं प्रदत्तवन्तः महाविद्यालयस्य व्याकरणविभागस्य विभागप्रमुखाः आचार्याः डॉ. संकर्षणपण्डामहाभागाः।

व्याख्यानमालायाः तृतीयदिवसे अगस्तमासस्य एकविंशतितमे दिनाङ्के विशिष्टव्याख्यातृरूपेण महाविद्यालयस्य प्राचार्याः धर्मशास्त्रपारङ्गताः डॉ. देवीपदरथमहोदयाः "धर्मशास्त्रे चतुर्वर्गसाधनोपायाः" इति विषयोपरि व्याख्यानं प्रदत्तवन्तः। तत्र स्वागतभाषणं प्रदत्तवन्तोऽस्माकं महाविद्यालयस्य धर्मशास्त्रविभागस्य अतिथि-अध्यापकाः डॉ. सुरञ्जनपाहाडिमहाभागाः एवञ्च धन्यवादार्पणं प्रदत्तवन्तः महाविद्यालयस्य धर्मशास्त्रविभागस्य अतिथि-अध्यापकाः डॉ. सौरभमण्डलमहाभागाः।

व्याख्यानमालायाः चतुर्थदिवसे अगस्तमासस्य द्वाविंशतितमे दिनाङ्के विशिष्टव्याख्यातृरूपेण पुरीस्थस्य श्रीजगन्नाथसंस्कृतविश्वविद्यालयस्य वेदविभागस्य विभागाध्यक्षाः आचार्याः प्रो. शत्रुघ्नपाणिग्राहिमहोदयाः निमन्त्रिताः आसन्। तत्र "जीवधर्मः" इति विषये वेदवेदान्ताधारेण ते विशिष्टं व्याख्यानं प्रदत्तवन्तः। कार्यक्रमेऽस्मिन् स्वागतभाषणं प्रदत्तवन्तोऽस्माकं महाविद्यालयस्य वेदान्तविभागस्य विभागप्रमुखाः डॉ. दयानन्दपाणिग्राहिमहाभागाः एवञ्च धन्यवादार्पणं प्रदत्तवन्तः महाविद्यालयस्य साहित्यविभागस्य अतिथि-अध्यापकाः डॉ. दीपकप्रधानमहाभागाः।

एवं रूपेण दिवसचतुष्टयव्यापिन्याः विशिष्टव्याख्यानमालायाः सञ्चालकरूपेण सुष्ठुसञ्चालनं कृतवन्तः महाविद्यालयस्यास्य व्याकरणविभागस्य अतिथि-अध्यापकाः डॉ. हरिपदवेरामहाभागाः इति।

# कलियाचकविक्रमकिशोर-आदर्शसंस्कृतमहाविद्यालयः

(केन्द्रीयसंस्कृतविश्वविद्यालयानुमोदितः)

हेडिया, पूर्वमेदिनीपुरम्, पश्चिमवङ्गः

# संस्कृतसप्ताहोत्सवः

दिनाङ्कः 16-08-2024 तः 23-08-2024 पर्यन्तम्



**प्रो.श्रीनिवासवरखेडी**
माननीयः कुलपतिः
केन्द्रीयसंस्कृतविश्वविद्यालयः
नवदेहली



**प्रो.आर्.जी.मुरलीकृष्णः**
कुलसचिवः,(प्रभारी)
केन्द्रीयसंस्कृतविश्वविद्यालयः
नवदेहली



**प्रो.रञ्जितकुमारवर्मन्**
महाविद्यालयपरिचालनासमितेरध्यक्षः
कलियाचकविक्रमकिशोर-
आदर्शसंस्कृतमहाविद्यालयः



**डा.देवीपदरथः**
प्राचार्यः
कलियाचकविक्रमकिशोर-
आदर्शसंस्कृतमहाविद्यालयः

# विशिष्टव्याख्यानमाला

## विशिष्टव्याख्यातारः



प्रो.रमाकान्तपाण्डेयः, निदेशकः,
केन्द्रीयसंस्कृतविश्वविद्यालयः,भोपालपरिसरः,भोपालः,मध्यप्रदेशः,
विषयः - संस्कृतं भारतीयज्ञानपरम्परा च
दिनाङ्कः - 19 - 08 - 2024, समयः - 03:30 वादनतः



प्रो.भारतभूषणत्रिपाठी, आचार्यः, व्याकरणविभागः
केन्द्रीयसंस्कृतविश्वविद्यालयः,लखनउपरिसरः,लखनउ,उत्तरप्रदेशः,
विषयः - काणादं पाणिनीयञ्च सर्वशास्त्रोपकारकम्
दिनाङ्कः - 20 - 08 - 2024, समयः - 03:30 वादनतः



प्रो.जयकृष्णमिश्रः, विभागाध्यक्षचरः,धर्मशास्त्रविभागः
श्रीजगन्नाथसंस्कृतविश्वविद्यालयः,पुरी,उत्कलः
विषयः - धर्मशास्त्रे चतुर्वर्गसाधनोपायाः
दिनाङ्कः - 21- 08 - 2024, समयः - 03:30 वादनतः



प्रो.शत्रुघ्नपाणिग्राही, विभागाध्यक्षः,वेदविभागः
श्रीजगन्नाथसंस्कृतविश्वविद्यालयः,पुरी,उत्कलः,
विषयः - जीवधर्मः
दिनाङ्कः - 22 - 08 - 2024, समयः - 03:30 वादनतः



डॉ.दयानन्दपाणिग्राही, सहायकाचार्यः अद्वैतवेदान्तविभागाध्यक्षश्च
समन्वयकः, संस्कृतसप्ताहोत्सवसमितेः
कलियाचकविक्रमकिशोर-आदर्शसंस्कृतमहाविद्यालयः

Live from 03:30pm

कार्यक्रमः गुगुलमीटमाध्यमेन भविता।

## विशिष्टव्याख्यानमालायाः कानिचन छायाचित्राणि

व्याख्याता- प्रो. रमाकान्तपाण्डेयः

विषयः- संस्कृतं भारतीयज्ञानपरम्परा च

दिनाङ्कः-19.08.2024


















# विशिष्टव्याख्यानमालायाः कानिचन छायाचित्राणि

व्याख्याता- प्रो. भारतभूषणत्रिपाठी

विषयः- काणादं पाणिनीयञ्च सर्वशास्त्रोपकारकम्


दिनाङ्कः-20.08.2024















## विशिष्टव्याख्यानमालायाः कानिचन छायाचित्राणि

व्याख्याता- डॉ. देवीपदरथः

विषयः- धर्मशास्त्रे चतुर्वर्गसाधनोपायाः

दिनाङ्कः-21.08.2024






# विशिष्टव्याख्यानमालायाः कानिचन छायाचित्राणि

व्याख्याता- प्रो. शत्रुघ्नपाणिग्राही


विषयः- जीवधर्मः

दिनाङ्कः-22.08.2024


















# जुखिया-कुङरनारायण-वाणीमन्दिर-उच्चमाध्यमिकविद्यालये

## दिनत्रयात्मकं संस्कृतसम्भाषणशिविरम्

पठत संस्कृतम्, वदत संस्कृतम्

लसतु संस्कृतं चिरं गृहे गृहे च पुनरपि

इति विचार्य भाषाजनन्याः संस्कृतभाषायाः प्रचाराय प्रसाराय चानुदिनं नैकविधयत्ना विधीयन्ते कलियाचकविक्रमकिशोर-आदर्शसंस्कृतमहाविद्यालयेन। तदङ्गत्वेन ऐषमो महाविद्यालयेन संस्कृतसप्ताहोत्सवमुपलक्ष्य जुखिया-कुङरनारायण-वाणीमन्दिर-उच्चमाध्यमिकविद्यालये अगस्तमासस्य २० दिनाङ्कतः २२ पर्यन्तं त्रिदिवसीयसरलसंस्कृतसम्भाषणशिविरं समायोजिम्। अस्य शिविरस्य समारोपः महाविद्यालयपरिसरे२३.०८.२०२४ तमदिनाङ्केऽभवत्। शिविरस्य सञ्चालनं डॉ. किंशुकसाहा (समन्वयकः), डॉ. सङ्कर्षणपण्डा (संयोजकः),डॉ. दीपकप्रधानः (सहायकः),डॉ. सौरभमण्डलः(शिक्षकः) चाकुर्वन्। शिविरेऽस्मिन् विद्यालयस्य त्रिंशत् छात्राः सोत्साहं भागमवहन्। छात्राः नृत्यम्, संगीतम्, लघुनाटकं (पठतु संस्कृतम्), सुभाषितकण्ठपाठञ्च विविधान् मनोरञ्जनकार्यक्रमान् प्रदर्शितवन्तः। एतदवसरे महाविद्यालयस्य प्राचार्यः डॉ. देवीपदरथः छात्राणां कृते पुरस्कारं प्रतिभागिप्रमाणपत्राणि च प्राददत्।

## विद्यालयस्तरीयसंस्कृतसम्भाषणशिविरस्य कानिचन छायाचित्राणि

विद्यालयनाम- वाणीमन्दिर-उच्चमाध्यमिकविद्यालयः

दिनाङ्कः-20.08.2024- 23.08.2024


















# समापनसमारोहे विद्यालययादागतैः छात्रैः सांस्कृतिककार्यक्रमे अंशग्रहणस्य कानिचन छायाचित्राणि

विद्यालयनाम- वाणीमन्दिर-उच्चमाध्यमिकविद्यालयः

दिनाङ्कः-23.08.2024



















